# Vyasaproktam Harimahatmyam

# વ્યાસપ્રોક્તં હરિમાહાત્મ્યમ્

## Document Information

Text title : Vyasaproktam Harimahatmyam

File name : vyAsaproktaMharimAhAtmyam.itx

Category : vishhnu, vishnu, skandapurANa, mAhAtmya

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 95/11-19||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# વ્યાસપ્રોક્તં હરિમાહાત્મ્યમ્

પરિનિર્મથ્ય વાગ્જાલં સુનિશ્ચિત્યાસકૃદ્બહુ ।
ઇદમેકં પરિજ્ઞાતં સેવ્યઃ સર્વેશ્વરો હરિઃ ॥ ૧૧॥

વેદે રામાયણે ચૈવ પુરાણેષુ ચ ભારતે ।
આદિમધ્યાવસાનેષુ હરિરેકોઽત્ર નાપરઃ ॥ ૧૨॥

સત્યં સત્યં પુનઃ સત્યં ત્રિસત્યં ન મૃષા પુનઃ ।
ન વેદાદપરં શાસ્ત્રં ન દેવોઽચ્યુતતઃ પરઃ ॥ ૧૩॥

લક્ષ્મીશઃ સર્વદો નાન્યો લક્ષ્મીશોઽપ્યપવર્ગદઃ ।
એક એવ હિ લક્ષ્મીશસ્તતો ધ્યેયો ન ચાપરઃ ॥ ૧૪॥

ભુક્તેર્મુક્તેરિહાન્યત્ર નાન્યો દાતા જનાર્દનાત્ ।
તસ્માચ્ચતુર્ભુજો નિત્યં સેવનીયઃ સુખેપ્સુભિઃ ॥ ૧૫॥

વિહાય કેશવાદન્યં યે સેવન્તેઽલ્પમેધસઃ ।
સંસારચક્રે ગહને તે વિશન્તિ પુનઃપુનઃ ॥ ૧૬॥

એક એવ હિ સર્વેશો હૃષીકેશઃ પરાત્પરઃ ।
તં સેવમાનઃ સતતં સેવ્યસ્ત્રિજગતાં ભવેત્ ॥ ૧૭॥

એકો ધર્મપ્રદો વિષ્ણુસ્ત્વેકો બહ્વર્થદો હરિઃ ।
એકઃ કામપ્રદશ્ચક્રી ત્વેકો મોક્ષપ્રદોઽચ્યુતઃ ॥ ૧૮॥

શાર્ઙ્ગિણં યે પરિત્યજ્ય દેવમન્યમુપાસતે ।
તે સદ્ભિશ્ચ બહિષ્કાર્યા વેદહીના યથા દ્વિજાઃ ॥ ૧૯॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે પ્ઞ્ચનવતિતમા- ધ્યાયાન્તર્ગતં
વ્યાસપ્રોક્તં વિષ્ણુમાહાત્મ્યસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ । અધ્યાય ૯૫/૧૧-૧૯॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa . adhyAya 95/11-19..

Proofread by PSA Easwaran

*Vyasaproktam Harimahatmyam*
pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*